### (3) रुक्मवती

( Also called चम्पकमाला ).

Def. रुक्मवती सा यत्र भमस्गाः ।
Sch. G. भ, म, स, ग (5. 5).
Ex. कायमनोवाक्यैः परिशुद्धै-
र्यस्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा
**रुक्मवती** विघ्नः खलु तस्य ॥

---

*Metres with 11 Syllables in a quarter*

### (त्रिष्टुभ्)

### (1) इन्द्रवज्रा

Def. स्यादिन्द्रवज्रा यदि तौ जगौ गः ।
Sch. G. त, त, ज, ग, ग (5. 6).
Ex. गोष्ठे गिरिं सव्यकरेण धृत्वा
**रुष्टेन्द्रवज्रा**हतिमुक्तवृष्टौ ।
यो गोकुलं गोपकुलं च सुस्थं
चक्रे स नो रक्षतु चक्रपाणिः ॥

### (2) उपेन्द्रवज्रा

Def. उपेन्द्रवज्रा प्रथमे लघौ सा ।
Sch. G. ज, त, ज, ग, ग (5. 6).
Ex. **उपेन्द्रवज्रा**दिमणिच्छटाभि-
र्विभूषणानां छुरितं वपुस्ते ।
स्मरामि गोपीभिरुपास्यमानं
सुरद्रुमूले मणिमण्डपस्थम् ॥

### (3) उपजाति

Def. अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ॥

Sch. G. When इन्द्रवज्रा and उपेन्द्रवज्रा are mixed in one stanza, the metre is called उपजाति. It is said to have 14 varieties.

Ex. अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥ Ku. 1. 1.

See R. 2, 5, 6, 7, 13, 14, 16, 18; Ku. 3; Ki. 17, &c.

When other metres also are mixed in one stanza, the metre is still called उपजाति; *e. g.* in the following verse from Māgha there is a combination of वंशस्थ and इन्द्रवंशा.

इत्थं रथाश्वेभनिषादिनां प्रगे
गणो नृपाणामथ तोरणाद्बहिः ।
प्रस्थानकालक्षमवेषकल्पना-
कृतक्षणक्षेपमुदैक्षताच्युतम् ॥ Śi. 12. 1.

### (4) दोधक

Def. दोधकमिच्छति भत्रितयाद्गौ ।
Sch. G. भ, भ, भ, ग, ग (6. 5).
Ex. या न ययौ प्रियमन्यवधूभ्यः
सारतरागमना यतमानम् ।
तेन सहेह बिभर्ति रहः स्त्री
सा रतरागमनायतमानम् ॥ Śi. 4. 45.

### (5) भ्रमरविलसितम्

( भ्रमरविलसिता )

Def. म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ।
Sch. G. म, भ, न, ल, ग (4. 7).
Ex. प्रीत्यै यूनां व्यवहिततपनाः
प्रौढध्वान्तं दिनमिह जलदाः ।
दोषामन्यं विदधति सुरत-
क्रीडायासश्रमशमपटवः ॥ Śi. 4. 62.

### (6) रथोद्धता

Def. रात्परैर्नरलगै रथोद्धता ।
Sch. G. र, न, र, ल, ग (3. 8 or 4. 7).
Ex. कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचित-
स्तेजसां हि न वयः समीक्ष्यते ॥ R. 11. 1.

See Ku. 8 also.

### (7) वातोर्मी

Def. वातोर्मीयं गदिता म्भौ तगौ गः ।
Sch. G. म, भ, त, ग, ग (4. 7).
Ex. ध्याता मूर्तिः क्षणमप्यच्युतस्य
श्रेणी नाम्नां गदिता हेलयाऽपि ।
संसारेऽस्मिन् दुरितं हन्ति पुंसां
**वातोर्मी** पोतमिवाम्भोधिमध्ये ॥

### (8) शालिनी

Def. मात्तौ गौ चेच्छालिनी वेदलोकैः ।
Sch. G. म, त, त, ग, ग (4. 7).
Ex. अंहो हन्ति ज्ञानवृद्धिं विधत्ते
धर्मं दत्ते काममर्थं च सूते ।
मुक्तिं दत्ते सर्वदोपास्यमाना
पुंसां श्रद्धा**शालिनी** विष्णुभक्तिः ॥

### (9) स्वागता

Def. स्वागता रनभगैर्गुरुणा च ।
Sch. G. र, न, भ, ग, ग (3. 8).
Ex. यावदागमयतेऽथ नरेन्द्रान्
स स्वयंवरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षु-
र्नारदस्त्रिदशधाम जगाम ॥ N. 5. 1.

See Ki. 9; Śi. 10.

---